सत्र –2014–15

कक्षा – 10 **विषयः–संस्कृतम्** **नियतकार्यम्–**

1. अधोलिखितवाक्येषु प्रकृतिप्रत्ययौ संयोज्य वियोज्य वा लिखत ।

क. न्यायाधीशेन न्यायः .... । (कृ+अनीयर्)

ख. पत्रवाहकेन पत्राणि .... । (आ+नी+ तव्यत्)

ग. मया सदा .... । (पठ्+ तव्यत्)

घ. .... (हनु+मतुप्) पूज्यः वर्तते ।

ङ. भारते अनेकानि .... (दर्शनीयानि) स्थानानि सन्ति ।

च. ....(दान+इन्) धन्याः लोके ।

छ.(नैतिकी)............ शिक्षा आवश्यकी ।

ज. मनुष्यः ....(समाज+ठक्) प्राणी अस्ति ।

झ. (धीमन्तः) .... सभ्यैः सह मैत्रीं कुर्वन्ति ।

ञ. इदं कार्यं .... (धर्म+ठक्) अस्ति ।

2. अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा चित्वा प्रदत्तविकल्पेभ्यःउत्तरपुस्तिकायां लिखत ।

क. तस्मिन् <u>राजगृहे</u> बालवाहनयोग्यं मेषयूथम् आसीत् ।(राजस्य गृहे, राजानः गृहे, राज्ञः गृहे)

ख. सः <u>नीलोत्पलम्</u> इव चक्षुः उत्पाट्य याचकाय समर्पितवान् ।(नीलम् उत्पलम्, नीलस्य उत्पलम्, नीलो त्पलम्)

ग. पुरुषः <u>न इच्छन्</u> अपि पापं चरति ।(अइच्छन्, अनिच्छन्, निच्छन्)

घ. <u>पञ्चानां गवां समाहारः</u> किं कथ्यते ?(पञ्चावः, पञ्चगावः , पञ्चगवम्)

ङ. एतेषां कलहः न <u>वानरेभ्यः हिताय</u> ।(वानरेभ्यहिताय, वानरहिताय, वानरेहिताय)

च. तेन <u>विविधग्रन्थाः</u> रचिताः ।(विविधैः ग्रन्थाः , विविधाः ग्रन्थाः, बहुविधाः ग्रन्थाः)

छ. किं च <u>न अर्घम्</u> यस्य तत् ?(अनर्घम्, नर्घम्, अर्घम्)

ज. <u>पञ्चवटी</u> कुत्रास्ति?(पञ्ची वटी, पञ्चमी वटी, पञ्चानां वटानां समाहारः)

3. अघोदत्तरिक्तस्थानानि प्रदत्तविकल्पेभ्यः समुचिताव्ययपदैः पूरयित्वा वाक्यानि पुनः लिखत ।

क. .... संस्कृतभाषा लोकभाषा आसीत् ।(अधुना, पुरा, इदानीम्)

ख. सन्तोषं .... कुत्रापि सुखं न भवति । (विना, सह, प्रति)

ग. गजः स्थूलः भवति । अतः .... चलति ।(उच्चैः, द्रुतम्, शनैः)

घ. यत्र गन्तुम् इच्छसि .... गच्छ । (तत्र, ततः, तदा)

ङ. यथा राजा............ प्रजा ।(इव,तथा,मा)

च सज्जनाः शशिनः किरणसमाः .... भवन्ति ।(अथ,पुरा,इव)

छ. .... कदाचित् दानशालासु विचरन् राजा अचिन्तयत् ।(अथ,पुरा,इव)

ज अद्यत्वे मेघाः .... गर्जन्ति । (इदानीम्,वृथा,उपरि)

4. अधोलिखिते संवादे वाच्यानुसारं प्रदत्तविकल्पेभ्यः उचितमुत्तरं चित्वा रिक्तस्थानानि पूरयत ।

अंशुः – किं बालकाः जले कर्गदनौकाः चालयन्ति ?

किंशुः – आम् , बालकैः जले कर्गदनौकाः .... । (चालयन्ते, चाल्यन्ते, चालियन्ते)

अंशुः – किं दर्दुराः 'टर्र टर्र' ध्वनिं .... ?(कुर्वन्ति, क्रियन्ते, क्रियते)

किंशुः – आम्, दर्दुरैः 'टर्र टर्र' .... क्रियते । (ध्वनिम्, ध्वनयः, ध्वनिः)

अंशुः – किं मयूराः वृक्षस्य अधः नृत्यन्ति ?

किंशुः – आम्, ... वृक्षस्य अधः नृत्यते ।(मयूराः, मयूरान् , मयूरैः)

5. सोहितः कदा किं किं करोति,समयं दृष्ट्वा रिक्तस्थानेषु संस्कृतेन लिखत ।

क. सः प्रातः .... वादने उत्तिष्ठति ।(6.00)

ख. सः .... वादने प्रातराशं करोति ।(7.15)

ग. सः .... वादने विद्यालयात् आगच्छति ।(2.30)

घ. सः .... वादने गृहकार्यं करोति ।(3.45)

6. निम्नलिखितश्लोकयोः भावार्थं मञ्जूषातः उचितपदानि चित्वा पूरयत ।

क. कोऽनर्थफलः ?मानः, का सुखदा? साधुजनमैत्री ।
सर्वव्यसनविनाशे को दक्षः? सर्वथा त्यागी ।।

भावः– अस्य भावः अयं यत् अभिमानः अनर्थकारिफलं ददाति । अतः मानः अत्र .... कथितः । साधुजनानां मैत्री सदैव सुखदायिनी अस्ति । यः मानवः सर्वथा .... भवति स एव सर्वासां विपदां विनाशं कर्तुं समर्थः भवति ।

ख. अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ।।

भावः– यत् .... श्रोतृणां हृदये उद्वेगं न करोति , सत्ययुक्तं .... हितकारि च भवति , तस्य वाचनं स्वाध्यायस्य अभ्यसनं च एव वाङ्मयं तपः उच्यते ।

वाक्यम्, अनर्थफलः, प्रियम्, त्यागी

7. रेखांकितपदानां स्थाने विकल्पेभ्यः समुचितमुत्तरं चित्वा प्रश्ननिर्माणं कुरुत ।

क. कमलपत्रे स्थितं जलवत् तरलं हि यौवनम् ।(कम्, काम्, किम्)

ख. कामः सङ्गात् सञ्जायते । (कात्, कस्याः, कस्मात्)

ग. मधुरभाषिणी वाणी पुरुषं प्रसन्नं करोति ।(किदृशी, कीदृशी, कीदृशि)

घ. दानशालासु विचरन् राजा अचिन्तयत् ।(कदा, कुतः, कुत्र)

ङ विवेकी जागर्ति ।(कः, का,किम्)

च मनसः निग्रहः कठिनः ।(कस्य, कस्याः, कस्मात्)

छ स्मृतिभ्रंशात् बुद्धेः नाशः भवति ।(कस्य, कस्याः, कस्मात्)

ज तृणेषु वह्निज्वालाःसमुत्थिताः ।(कः, काः,किम्)

8. घटनाक्रमानुसारम् अधोलिखितवाक्यानि पुनः क्रमेण लिखत ।

क. राजगृहे जिह्वालोलुपः एकः मेषः प्रविश्य यत् किमपि खादति स्म ।

ख. तत्रस्थान् दग्धान् अश्वान् दृष्ट्वा राज्ञा वैद्याः आहूताः ।

ग. मेषताडनं दृष्ट्वा वानरयूथपः कपीन् राजभवनं त्यक्तुम् अकथयत् ।

घ. वानरमेदः एव औषधमिति श्रुत्वा मृत्युभयात् कपयः पश्चातापं कुर्वन्ति स्म ।

ङ. एकस्मिन् प्रासादे चन्द्रनाम्नः भूपतेः पुत्राः वानरैः सह क्रीडन्ति स्म ।

च. यदा वानराः स्वर्गतुल्यान् भोज्यपदार्थान् त्यक्तुं न ऐच्छन् तदा वानरयूथपः एकाकी वनमगच्छत् ।

छ. सूपकाराः तं येन केन पदार्थेन ताडयन्ति स्म ।

ज. एकदा ज्वलितकाष्ठेन ताडितः ज्वलन् मेषः अश्वशालां प्राविशत् ।

9. प्रसंगानुसारं रेखांकितपदानां शुद्धमर्थं चित्वा लिखत ।

क. शक्रः तत्रैव अन्तर्हितः अभवत् ।

अ.अग्रे स्थितः ब. विलुप्तः स. मध्ये स्थितः ।

ख. वानरयूथपः सर्वान् वानरान् रहसि अकथयत् ।

अ.एकान्ते ब. रहस्यम् स. मार्गे ।

ग. हेयं च किम् ? अकार्यम् ।

अ.अश्वः ब. पूर्वं दिनम् स.त्याज्यम् ।

घ. तस्य प्रथमम् एकं चक्षुः प्रतिष्ठितम् अभवत् ।

अ.स्थापितम् ब.आदरयोग्यम् स.प्रस्थानयोग्यम्

ङ. किं विषम्? अवधीरणा गुरुषु।

अ सम्मानेन ब तिरस्कारः स अवधारणा

च. निधानताम् याति हि दीयमानम्।

अ निष्पन्नताम् ब मोदताम् स सम्पन्नताम्

छ.मनः चञ्चलं प्रमाथि बलवत् च अस्ति।

अ कष्टकारि ब प्रमथनशीलम् स विनाशकारि

ज.जनकल्यसणकर्मसु रतः राजा प्रजाः पुत्रवत् पालयति स्म।

अ प्रसन्नः ब संलग्नः स मुग्धः

10.' प्रातःकालस्य भ्रमणम् 'इति विषयमधिकृत्य निम्नलिखितपदानां सहायतया च पंचवाक्येषु एकम् अनुच्छेदं लिखन्तु।

उपवनम्,शीतलः वायुः,स्वास्थ्यवर्धकः,खगानां कलरवः,शान्तं वातावरणम्,सूर्योदयः।

11. वाच्यपरिवर्तनं कुरुत ।

क. त्वं किं करोषि ?

ख. ईश्वरः अस्ति ।

ग. सर्वे भगवन्तं पूजयन्ति ।

घ. शीलायाः भ्राता आगच्छति ।

ङ. देवाः गीतानि गायन्ति ।

12. मूल्यपरकप्रश्नाः

क.भगवतः बोधिसत्वस्य राज्ये अर्थिनां संख्या कथं विरला जाता?

ख.विषयान् ध्यायतः पुरुषस्य संगः केषु उपजायते?

ग.मनसः निग्रहं कथम् अतिकठिनम् अस्ति?

——————————0——————————